## पञ्चदशः पाठः

# स्वतन्त्रतादिवसः

(केचन छात्राः विद्यालयस्य प्राङ्गणे तिष्ठन्ति चर्चां कुर्वन्ति च)

सुरेशः – भो महेश! पश्य! अष्टमकक्षायाः छात्राः किं कुर्वन्ति?

महेशः – श्वः अगस्तमासस्य पञ्चदशदिनाङ्कः। अस्माकं स्वतन्त्रतादिवसस्य समारोहः भविष्यति। अतः वरिष्ठाः छात्राः विद्यालये विशेषसज्जां कुर्वन्ति।

सुधीरः – अहं पठितवान् यत् १८५७ तमे वर्षे प्रथमस्वतन्त्रतासङ्ग्रामः अभवत्। ततः भारतीयाः स्वतन्त्रतायै निरन्तरं प्रयासम् अकुर्वन्। ते भीषणकष्टानि असहन्त।

मनधीरः – सत्यम्! अनन्तरम् एव १९४७ तमे वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के तेषां प्रयत्नाः सफलाः जाताः। तस्य स्मृत्यर्थम् एव प्रतिवर्षं स्वतन्त्रतादिवसस्य उत्सवः भवति।

वरदा – पश्य! सुरेश पश्य! अवन्तिका, मीनाक्षी काशीनाथः च अत्रैव आगच्छन्ति।

(सर्वे तत्र आगच्छन्ति)

मीनाक्षी – अहो शोभनम्! श्वः समारोहे किं किं भविष्यति?



सुरेशः – सर्वे छात्राः गणवेशे प्रातः सप्तवादने विद्यालयम् आगमिष्यन्ति। ध्वजस्थलस्य समीपे पङ्क्तिबद्धाः स्थास्यन्ति।

सोमदत्तः – सर्वे शिक्षकाः कर्मचारिणः अपि स्थास्यन्ति। अनन्तरम् अस्माकं प्रधानाध्यापकः ध्वजोत्तोलनं करिष्यति। तत्पश्चात् सर्वे समवेतस्वरेण 'जनगणमन' इति राष्ट्रगानं गास्यन्ति। पश्चात् प्रधानाध्यापकमहोदयः उद्बोधनं करिष्यति।

माधवी – तदनन्तरं छात्रसभायां केचन छात्राः गीतानि गास्यन्ति केचन भाषणानि करिष्यन्ति च। मिष्टान्नवितरणेन कार्यक्रमस्य समापनं भविष्यति।

वरदा – अहं संस्कृतमाध्यमेन तिलकस्य महात्मागान्धिमहोदयस्य नेहरुमहोदयस्य सुभाषचन्द्रस्य च महत्कार्यविषये भाषणं करिष्यामि।

नागेशः – चन्द्रशेखरआजाद-अशफाकउल्लाहखान-भगतसिंहादयः स्वतन्त्रतायै प्राणार्पणम् अकुर्वन्। भाषणस्य मम विषयः 'क्रान्तिकारीणां कार्यम्' इति अस्ति।

मनधीरः – शोभनः हि स्वतन्त्रतादिवसः। इदानीं वयं गृहं गच्छामः। मया अपि सुरेशमीनाक्षीकाशीनाथैः सह समूहगीतस्य अभ्यासः करणीयः।

''ध्वजो धूयतां भारतीयस्य लोके।''

## शब्दार्थाः

प्राङ्गणे = प्राङ्गण में | श्वः = आने वाला कल

विशेषसज्जां = विशेष सजावट

प्रथमस्वतन्त्रतासङ्ग्रामः = आजादी की पहली लड़ाई

निरन्तरम् = लगातार | भीषणकष्टानि = अत्यधिक कष्टों को

असहन्त = सहन किया | स्मृत्यर्थम् = स्मरण के लिये

धारयित्वा = पहनकर | ध्वजस्थलस्य = झण्डा फहराने के स्थान के

स्थास्यन्ति = खड़े रहेंगे | ध्वजोत्तोलनं = झण्डा फहराना

अनन्तरम् = उसके बाद | गास्यन्ति = गाएँगे

धूयतां = फहराएँ

# अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) कस्मिन् मासे स्वतन्त्रतादिवसः भवति?

(ख) विद्यालये कः ध्वजोत्तोलनं करिष्यति?

(ग) सुरेशमीनाक्षीकाशीनाथैः सह कस्य अभ्यासः करणीयः?

(घ) भगतसिंहादयः कस्यै प्राणार्पणम् अकुर्वन्?

२. एकवाक्येन उत्तरं लिखत–

(क) प्रथमस्वतन्त्रतासङ्ग्रामः कदा अभवत्?

(ख) छात्राः पङ्क्तिबद्धाः कुत्र स्थास्यन्ति?

(ग) के विद्यालये विशेषसज्जां कुर्वन्ति?

(घ) भारतीयाः कस्यै निरन्तरं प्रयासम् अकुर्वन्?

३. प्रश्नवाचकशब्दान् प्रयुज्य प्रश्ननिर्माणं कुरुत–

(किम्, के, कस्य, कदा)

यथा - <u>भारतीयाः</u> भीषणकष्टानि असहन्त।

के भीषणकष्टानि असहन्त?

(क) छात्राः प्रातः <u>सप्तवादने</u> विद्यालयम् आगमिष्यन्ति।

(ख) 'क्रान्तिकारीणां कार्यम्' इति <u>नागेशस्य</u> भाषणस्य विषयः।

(ग) <u>सर्वे</u> समवेतस्वरेण 'जनगणमन' इति राष्ट्रगानं गास्यन्ति।

(घ) वरदा संस्कृतमाध्यमेन <u>भाषणं</u> करिष्यति।

४. निर्देशानुसारं लकारपरिवर्तनं कुरुत–

| | | | | |
|---|---|---|---|---|
| यथा– | भविष्यति | लट्लकारे | | भवति |
| (क) | करिष्यन्ति | लङ्लकारे | → | ................ |
| (ख) | स्थास्यन्ति | लट्लकारे | → | ................ |
| (ग) | भविष्यन्ति | लङ्लकारे | → | ................ |
| (घ) | करिष्यन्ति | लट्लकारे | → | ................ |